# ७. पादुका सहस्रम् - अभिषेक पद्धतिः (३०)

पाहि नः पादुके यस्या विधास्य न्नभिषेचनम् ।
आभिषेचनिकं भाण्डं चक्रे रामः प्रदक्षिणम् ॥ ७.१॥ १८१॥

राघवस्य चरणौ पदावनि प्रेक्षितुं त्वदभिषेक मीषतुः ।
आभिषेचनिक भाण्ड सन्निधौ यत्प्रदक्षिण गतिः शनैर्ययौ ॥ ७.२॥ १८२॥

मूर्धाभिषिक्तै र्नियमेन वाह्यौ
विचिन्त्य नूनं रघुनाथ पादौ ।
रत्नासनस्थां मणिपादुके त्वां
रामानुजन्मा भरतोऽभ्य षिञ्चत् ॥ ७.३॥ १८३॥

भ्रातुर्नियोगेऽप्य निवर्तमानं राज्याभिषेकं च परित्यजन्तम् ।
रामानुजौ तौ ननु पारतन्त्र्यात् उभावुभाभ्यां भवती जिगाय ॥ ७.४॥ १८४॥

निवेश्य रङ्गेश्वर पादरक्षे भद्रासने सादर मभ्यशिञ्चत् ।
वशी वसिष्ठो मनुवंशजानां महीक्षितां वंश पुरोहितस्त्वाम् ॥ ७.५॥ १८५॥

कृताभिषेका भवती यथावत् रङ्गेश पादावनि रत्नपीठे ।
गङ्गा निपात स्नपितां सुमेरोः अधित्यका भूमि मधश्चकार ॥ ७.६॥ १८६॥

वसिष्ठ मुख्यै र्विहिताभिषेकां राज्यासने राम निवेश योग्ये ।
तुष्टाव रङ्गेश्वर पादरक्षे प्राचेतसस्त्वां प्रथमः कवीनाम् ॥ ७.७॥ १८७॥

रक्षोवधार्थं मणिपादरक्षे रामात्मनो रङ्गपतेः प्रवासे ।
रक्षोऽपकाराद्भवती वितेने राजन्वतीं कोसल राजधानीम् ॥ ७.८॥ १८८॥

प्राप्ताभिषेका मणिपादरक्षे प्रतापमुग्रं प्रतिपद्यमाना ।
शशास पृथ्वीं भवती यथावत् साकेत सिंहासन सार्वभौमी ॥ ७.९॥ १८९॥

दशाननादीन् मणिपादरक्षे जिगीषतो दाशरथे र्वियोगात् ।
जातोपतापा त्वयि संप्रयुक्तैः तीर्थोदकै रुच्छ्वसिता धरित्री ॥ ७.१०॥ १९०॥

अध्यासितं मनुमुखैः क्रमशो नरेन्द्रैः
आरोप्य देवि भवतीं तपनीय पीठम् ।
राज्याभिषेक मनघं मणिपादरक्षे
रामोचितं तव वशं भरतो वितेने ॥ ७.११॥ १९१॥

स्नेहेन देवि भवतीं विषयेऽभिषिञ्चन्
द्विस्सप्त सङ्ख्य भुवनोदर दीपरेखाम् ।
जातं रघूद्वह दिवाकर विप्रयोगात्
अन्धं तमिस्र महरद्भरतः प्रजानाम् ॥ ७.१२॥ १९२॥

हस्तापचेय पुरुषार्थ फलप्रसूतेः
मूलं पदावनि मुकुन्द महीरुह स्त्वम् ।
छाया विशेष मदिशद्यदसौ प्रजानाम्
आवर्जितै स्त्वयि शुभै रभिषेक तोयैः ॥ ७.१३॥ १९३॥

अह्नाय राम विरहात् परिखिन्न वृत्तेः
आश्वासनाय भवती मणिपादरक्षे ।
तीर्थाभिषेक मपदिश्य वसुन्धरायाः
चक्रे तदा समुचितं शिशिरोपचारम् ॥ ७.१४॥ १९४॥

मालिन्य माश्रितवती मणिपादरक्षे
पङ्केन केकय सुता कलहोत्थितेन ।
शुद्धिं परा मभिजगाम वसुन्धरेयं
त्वत्तः क्षणा न्निपतितै रभिषेक तोयैः ॥ ७.१५॥ १९५॥

आवर्जितं मुनिगणेन जगद्विभूत्यै
तोयं पदावनि तदा त्वयि मन्त्रपूतम् ।
मूलावसेक सलिलं निगम द्रुमाणां
शापोदकं च समभूत्क्षण दाचाराणाम् ॥ ७.१६॥ १९६॥

विप्रोषिते रघुपतौ भवती यथार्हं
मान्ये पदे स्थितिमती मनुवंश जानाम् ।

आत्मन्यथर्व निपुणैः प्रहितैः प्रजानाम्
अश्रूण्यपास्य दभिषेक जलप्रवाहैः ॥ ७.१७॥ १९७॥

प्रायो विशोषित रसा पति विप्रयोगात्
पर्याकुली कृत समुद्र पयोधरा गौः ।
अम्ब त्वदिय मभिषेक जलं पिबन्ती
धेनुर्बभूव जगतां धनधान्य दोग्ध्री ॥ ७.१८॥ १९८॥

वृत्ते यथाव दभिषेक विधौ बभासे
पश्चात्तवाम्ब भरतेन धृतः किरीटः ।
आकस्मिक स्वकुल विप्लव शान्ति हर्षात्
प्राप्तस्त्विषा मिव पति र्मणिपादुके त्वाम् ॥ ७.१९॥ १९९॥

मनुवंश पुरोहितेन मन्त्रैः
अभिमन्त्र्य त्वयि पादुके प्रयुक्तम् ।
अभिषेक जलं क्षणेन राज्ञां
शमयामास समुत्थितान् प्रतापान् ॥ ७.२०॥ २००॥

पादपा दुपहृता रघूद्वहात्
आलवाल मिव पीठ माश्रिता ।
अभ्यषेचि भवती तपोधनैः
पारिजात लतिकेव पादुके ॥ ७.२१॥ २०१॥

अलघुभि रभिषेक व्यापृतै रम्बुभिस्ते
दिनकर कुल दैन्यं पादुके क्षालयिष्यन् ।
स खलु कमलयोनेः सूनुराधत्त मन्त्रेषु
अधिक नियम योगां शक्ति माथर्वणेषु ॥ ७.२२॥ २०२॥

दिनकर कुलजानां देवि पृथ्वी पतीनां
निरुपधि मधिकारं प्राप्नुवत्यां भवत्याम् ।
अजनिषत समस्ताः पादुके तावकीन-
स्नपन सलिल योगा न्निम्नगा स्तुङ्गभद्राः ॥ ७.२३॥ २०३॥

तव विधिव दुपात्ते सार्वभौ माभिषेके
भरत समयविद्भिः पादुके मन्त्रि मुख्यैः ।
त्वदवधि निजकर्म स्थायिनीनां प्रजानां
प्रथम युग विशेषाः प्रादुरासन् विचित्राः ॥ ७.२४॥ २०४॥

अवसित रिपु शब्दा नन्वभूस्त्वं तदानीं
रघुपति पदरक्षे लब्ध राज्याभिषेका ।
चलित भुज लतानां चामर ग्राहिणीनां
मणिवलय निनादै र्मेदुरान् मन्त्रघोषान् ॥ ७.२५॥ २०५॥

समुचित मभिषेकं पादुके प्रप्नुवत्यां

त्वयि विनिपतितानां देवि तीर्थोदकानाम् ।
ध्वनि रनुगत मन्त्रः सीदतां कोसलानां
शमयितु मल मासीत् सङ्कुला नार्तनादान् ॥ ७.२६॥ २०६॥

दिविष दनुविधेयं देवि राज्याभिषेकं
भरत इव यदि त्वं पादुके नान्वमंस्थाः ।
कथमिव रघुवीरः कल्पये दल्पयत्नः
त्रिचतुर शरपातै स्तादृशं देवकार्यम् ॥ ७.२७॥ २०७॥

कतिचन पदपद्म स्पर्श सौख्यं त्यजन्ती
व्रतमतुल मधास्त्वं वत्सरान् सावधाना ।
रघुपति पदरक्षे राक्षसै स्त्रासितानां
रणरणक विमुक्तं येन राज्यं सुराणाम् ॥ ७.२८॥ २०८॥

अथर्वोपज्ञं ते विधिव दभिषेकं विदधतां
वसिष्ठादीना मप्युपचित चमत्कार भरया ।
त्वदास्थान्या रङ्ग क्षिति रमण पादावनि तदा
लघीयस्यो जाता रघुपरिष दाहो पुरुषिकाः ॥ ७.२९॥ २०९॥

अभिषेचयतु स रामः
पदेन वा स्पृशतु पादुके भवतीम् ।
अविशेषित महिमा त्वं

क्व वा विशेषः क्षमा समेतानाम् ॥ ७.३०॥ २१०॥

इति कवितार्किक सिहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्यस्य कुतिषु श्रीरङ्गनाथ पादुकासहस्रे अभिषेक पद्धतिः सप्तमी ॥